श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीरामचतुश्श्लोकी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामचतुश्श्लोकी ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

रामः कौशिकमन्वगात्पथिमुनेर्वाचाऽवधीत्ताटकां
सत्रं तस्य ररक्ष तेन कथिताः शुश्राव तास्ताः कथाः।
गत्वाऽथो मिथिलां विधाय दृषदं योषिन्मणिं सन्मुनेः
भङ्क्त्वा धूर्जटिचापमाप रमणीं सीताभिधानामपि॥ 1 ॥

सीतायाः करलालनेन स कृती जित्वा मुनिं भार्गवं
साकेतं तरसा प्रविश्य जननीमानन्दयन् मध्यमाम्।
आसीद्यो विपिने चतुर्दश समा रक्षन् मुनीनानतान्
रक्षस्सङ्घमथावधीदघटयद्राज्यं च सूर्यात्मजे॥ 2 ॥

वायोरात्मभुवा ततो हनुमता पाथोधिपारस्थितां
प्राणेभ्योऽपि गरीयसीं प्रियतमां विज्ञाय रक्षोहृताम्।
सेतुं वारिनिधौ विधाय विविधानन्ताघविध्वंसनं
लङ्कायां विलुलाव रावणशिरोवृन्दानि वन्देय तम्॥ 3 ॥

आरुह्याथ विभीषणेन सुभगं भक्त्या समावेदितं
मान्यं पुष्पकमञ्जसा निजपुरीमागत्य मित्रैर्वृतः।
आनन्दाय वसिष्ठकाश्यपमुखैः पट्टाभिषिक्तो विभुः
तस्मिन् जाग्रति जानकीप्रियतमे का नाम भीतिर्मम॥ 4 ॥

धनुष्करचतुःश्लोकी धनुष्पुरकवीरिता।
सर्वदा कुर्वतां चित्ते सर्वदा भातु सन्मता॥ 5॥

॥ इति श्रीरामचतुश्श्लोकी समाप्ता॥